**E/EB**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

## संस्कृत विशारद (बी.ए.) बहिःस्थ

## परीक्षाः जून–जुलै – २०२२

## सत्र ५ वे

**विषयः व्याकरण–५/ सामान्य व्याकरण–३ (व्याकरण–भाषान्तर–निबंध)** (19E451/EB-4502)

**दिनांकः** ०५/०७/२०२२ **गुण : ८०** **वेळ : दु. २.०० ते ५.००**

**सूचनाः** १) उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न सोडवणे अनिवार्य.

प्र.१. **सूचनानुसारं कुरुत।** **(३०)**

१) सन्धिविच्छेदं कुरुत (केचन ४)
१)तच्छ्रुत्वा २)युष्मांश्च ३)वाप्यसुन्दरम् ४)सदैवावध्यभावः ५)नृपतेर्गुरुः ६)कुर्यादद्यैव

२) सन्धिं कुरुत। (केचन ४)
१)अथ+एनम्+आनीय २) भर्तुः+बहुमतम्+इति ३)प्रविशतु+आवुत्तः ४)निःश्वास+अस्य
५)राज्यभयात्+चौरभयात+वा ६)च+अस्मिन्+एव

३) समासविग्रहं कुरुत, समासनामानि च लिखत। (केचन ४)
१)यथाशक्ति २)विशालाक्षः ३)अपण्डितः ४)त्रिभुवनम् ५)मेघश्यामः
६)निर्मक्षिकम् ७)द्वियमुनम् ८)धनधान्यम् ९)उत्तमाध्यममध्यमाः

४) प्रयोगपरिवर्तनं कुरुत। (केषाञ्चन चतुर्णां वाक्यानाम्)
१)विद्वद्भिः यज्ञाः इज्यन्ते। २)सुधा सुन्दरं लेखं लिखितवती। ३)सिंहैः मृगाः हन्यन्ते।
४)अज्ञानदनेन अपराधः कृतः। ५)एतैः छात्रैः अत्रैव उष्यते। ६)वने गजाः तडागेभ्यःजलं पिबन्ति

५) रूपपरिचयं कारयत। (कानिचन त्रीणि)
१)चन्द्रमसि २)गिरा ३)श्रीमत्सु ४)अददुः ५)स्मर्यते ६) आहुः

६) कानिचन त्रीणि रूपाणि लिखत।
१)शी धातोः लट्लकारस्य प्रथमपुरुषस्य एकवचनम् २)रुध् लोट्लकारस्य मध्यमपुरुषस्य एकवचनम्
३)पत् धातोः लिट्लकारस्य (परोक्ष भूतकाल) प्र.पु.ए.व. ४)धेनु शब्दस्य सप्तमी ए. व.
५) पथिन् शब्दस्य प्रथमा एकवचनम्

७) समानार्थकान् शब्दान् लिखत (चतुर्णां शब्दानाम्)।
१)काननम् २)अध्वरः ३)वपुः ४) महीरुहः ५) वल्ली ६) बुधः

प्र.२. **संस्कृतभाषया एकं लघुनिबन्धं लिखत।** **(१०)**
**१) रामायणम् २) सज्जनसंगतिः**

प्र.३. **अधोनिर्दिष्टानां केषाञ्चन त्रयाणां माध्यमभाषया अनुवादं कुरुत।** **(१२)**

अ) वनवासकालं यापयन् युधिष्ठिरः अर्जुनाय कठिनं तपः कृत्वा विजेतृशक्तिं प्राप्तुं प्रैरयत्। अर्जुनः दिव्य धनुः खड्गं चादाय उत्तरस्यां दिशायां हिमालयमगच्छत्। तत्रार्जुनः दण्डम् अजिनं च धारयित्वा फलमूलानि भक्षयन् शंकरराधनं व्यदधात्। तस्य उग्रं तपोऽवलोक्य महर्षयः पार्थस्य कर्म प्राशंसन्। महादेवोऽपि तस्य तपसा प्रसन्नो भूत्वा अवदत्–'सदा विजयी भव।'

ब) अस्ति कश्चिच्छृगालः स्वेच्छया नगरोपान्ते भ्रमन् नीलसंधानभाण्डे निपतितः। पश्चात्तत उत्थातुम् असमर्थः प्रातरात्मानं मृवत्संदर्श्य स्थितः। अथ नीलोभाण्डस्वामिनासावुत्थाय दूरे नीत्वा परित्यक्तः। ततोऽसौ वनं गत्त्वात्मानं नीलवर्णमवलोक्याचिन्तयत्।ʾहमिदानीमुत्तमवर्णः। तदात्मनः किमुत्कर्षं न साधयामि इत्यालोच्य शृगालनाहूतवान्।

क) जलबिन्दुनिपातेन क्रमशः पूर्यते घटः। स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च।। आशा नाम मनुष्यांणां काचिदाश्चर्यशृङ्खला।। यया बद्धाः प्रधावान्ति मुक्तास्तिष्ठान्ति पङ्गुवत्।। यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि। निरस्तपादपे देशे एरण्डोऽपि द्रुमायते।।

ड) ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति। भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम्।। यत् कर्म कुर्वतोऽतस्य स्यात् परितोषन्तरात्मनः। तत्प्रयत्नेन कुर्वीत विपरीतं तु वर्जयेत्।। न देवो विद्यते काष्ठे, न पाषाणे, न मृन्मये। भावेषु विद्यते देवस्तस्माद् भावो हि कारणम्

प्र.४. **केषाञ्चन चतुर्णां सूत्राणां स्पष्टीकरणं लिखत।** **(१६)**
१)साधकतमं करणम्। २) प्रतिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा।
३) अपादाने पञ्चमी। ४) अव्ययीभावे शरत्प्रभृतिभ्यः। ५)सह सुपा

प्र.५. **टिप्पण्यौ लिखत।** **(१२)**
१)कर्मकारकम् २)अधिकरणकारकम् ३) अव्ययीभावः ४) समासप्रकाराः

..................